1026

॥अथजीवसिद्धकनिर्णयप्रा०॥
॥पत्र३१॥

१ ॥श्रीगणेशायनमः॥ ॥रघुवीरपदद्वंद्वंनिधायहृदिमंगलं॥कुर्वतांस
र्वकार्याणिनिर्विघ्नाःकार्यसंपदः॥इहजीवत्सिदृक्कृत्यसाधारणेषुस्नान
संध्याब्रह्मयज्ञोपासनादिषुनित्येषुग्रहणस्नानादिनैमित्तिकेषुलक्ष
होमतुलापुरुषादिकाम्येषुचविशेषाभावादप्रतिबद्धएवाधिकारः।ए
वमेवनित्येषुमघादिनिषेधेषुनैमित्तिकेषुचांतर्वत्नीपतिसमुद्रस्नानादि
निषेधेषुकाम्येषुचायुःकामादितिथिविशेषतैलादिनिषेधेषुअविशेषा
दप्रतिबद्धएवाधिकारः।एवमेवोद्यदादित्यानिरीक्षणादिषुनित्येषुनै १

मित्तिकेषुचविभवादिनिमित्तजीर्णवस्त्रधारणादिकाम्येषुचायुःकामा
दिगुर्वादिनामग्रहणादिषुवर्जनरूपेषुपर्युदासेष्वपिश्रविशेषादधिका
रः।केषुचित्तस्यानधिकारोविशेषदर्शनादवगम्यते।निषिद्धेषुकेषुचित्क
दाचित्कचिच्चप्रतिप्रसवात्पुनरधिकारोपिगम्यते।तदेतदुभयंमन्वादि
स्मृतिषुतद्वाक्यविचारार्थेषु हेमाद्र्यादिनिबंधेषुचतत्रतत्रभिन्नेषुप्रका
रेषुविशकलितमुक्तमितिसर्वमेकत्रसंगृह्यसम्यग्विचार्यचात्रसंक्षेपणा
नुष्ठानमेवकर्तव्यमितिनिरूप्यते॥ ॥तत्रतावन्निषिध्यानि॥ ॥वृद्धमनुः॥पादु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

२ केचोत्तरीयंचतर्जन्यांरूप्यधारणं॥नजीवत्पित्कःकुर्याज्ज्येष्ठेभ्रातरिजीव
ति॥पादुकेकाष्ठमय्यो।निरूपपदप्रयोगेनतत्रैव शक्तिनिरूपणात्उत्तरीय
मुपरिवासः।तच्चनोपरिवासोमात्रंकिंतुसग्रंथिपरिमंडलंवस्त्रमुत्तरीयंकुर्या
त्।वस्त्रोत्तरीयाभावेत्वेकांगुलंद्व्यंगुलंत्र्यंगुलंचतुरंगुलंसूत्रेरचितंपरिमं
डलमुत्तरीयंकुर्यादिति जात्कर्ण्यैकमुत्तरीयरूपंनिषिद्धं।एतेनेवयज्ञोप
वीतेद्वेधार्येश्रोतेस्मार्तेचकर्मणि॥तृतीयमुत्तरीयार्थेवस्त्राभावेतदिष्यते॥
विश्वामित्रोक्तमुत्तरीयस्थानापन्नंतृतीयमुपवीतमपिनिषिद्धं।उपरिवस्त्र २

मात्रंतुजीवत्पित्कस्यापिभवत्येव।एकवस्त्रोनभुंजीयान्नकुर्याद्देवतार्चनं॥
नचार्चयेद्द्विजान्नान्यत्कुर्यादेवंविधोनरइति।एकवस्त्रस्यगोभिलेनकर्मनि
षेधात्।इहचसर्वकर्मस्वेकवस्त्रनिषेधोद्रष्टव्यः।भोजनादिग्रहणंतुउदाहर
णार्थमित्यावश्यकलार्थंवा।नन्वेकवस्त्रइत्यस्यसामान्यरूपत्वात् जीवत्पित्
कस्यसर्वोत्तरीयबाधइतिचेन्नाउत्तरीयशब्दस्ययोगविशेषेपिजात्कर्ण्यैक्यो
त्तरीयेरूढिविशेषात्।रूढेश्चयोगाद्बलीयस्त्वात्।द्वित्रिरात्रादिष्वेवाहीनश
ब्दवत्।एवमिहापितर्जन्यांरूप्यधारणंइहतर्जनीरूप्य धारणस्यविशिष्ट

३ स्येवोद्देश्यत्वं। नब्राह्मणंहन्यादितिब्राह्मणहननस्येवश्रन्यथारूप्यालंका
रादेरपिनिषेधापत्तेः। एतानिजीवत्पित्रग्रजोनकुर्यादितिवाक्यार्थः। यत्रतुनि
त्यनैमित्तिककाम्येषुपादुकादिधारणंविहितंतत्रनायंनिषेधः। अस्यसामा
न्यरूपत्वात्तस्यविशेषत्वेनबलीयस्त्वात्। नचैतस्यविहिताविहितविषय
त्वेनसामान्यरूपत्ववत्तस्यापिजीवदजीवत्पितृकविषयत्वेनसामान्यरूपत्वाद्वि
परीतोबाध्यबाधकप्रसंगइतिचेन्नात---णाघ्रातस्यमृतपितृक
मात्रविषयत्वेनित्यानित्यप्रसंगविरोधापातात्। तस्मात्तेनायमेवनिषेधो ३

बाध्यतइतिकथा---ज्येष्ठोभ्रातायदातिष्ठेत्पितावाप्रपितामहः॥कनिष्ठ
पुत्रपौत्राणंआधाननंनैवकारयेत् इतिायदापित्रादिरुताधानइतिव्याख्ये
यं। आर्त्विज्यरूपस्यकारणस्यरागप्राप्तत्वात्कुर्यादितिव्याख्येयं। मृतपितृकस्या
पिविद्यमानपितामहकस्यनाधानमितिदर्शयितुंपितामहग्रहणं। अनुज्ञायां
तुनायंनिषेधः। अनुज्ञातस्तुकुर्वीतगवस्यवचनंयथेतितेनैवोक्तत्वात्। अग्र
जस्तुयदानाग्निरादध्यादनुजःकथं। अग्रजानुमतःकुर्यादग्निहोत्रंयथाविधीति
वृद्धवसिष्ठस्मरणात्। पितापितामहोयस्यश्रग्रजोवाप्यनग्निमान्। तपोग्नि

४ होत्रमंत्रेषुनदोषःपरिवेदने।इत्युत्रानसस्मरणात्।तपोवानप्रस्थसन्यासाश्रमो॥
वानप्रस्थतयैववा।अग्निहोत्रंतदुपकारकमाधानं।मंत्रोवेदाध्ययनं।मंत्रसाध
नंवा।उत्तरानुरोधादग्निमानितितृतीयोपलक्षणं।सुमंतुवाक्येकवाक्यतयाचै
तदनुज्ञाविषयं।एवमेवसोमयागादावपि।पित्रादिधृतसोमयागादिषुविद्यमा
नेषुपुत्रादेरनधिकारः।तथाचत्रिकांडमंडने।परिष्टिदोषसंप्राप्तोनयष्टव्यंकदाच
नादर्शेष्टिंपोर्णमासेष्टिंसोमेज्यामग्निसंग्रहं।अग्निहोत्रंविवाहंचप्रयोगेप्रथमेस्थि
तं।नकुर्याज्ज्ञानकेज्येष्ठसोदरेवाप्यकुर्वतीति।दर्शपूर्णमासयोःपृथगुपादानं।इत ४

पोर्णमासेप्रतिबंधादिनावाऽकृतदर्शेपिदोषंवक्तुं।एवमग्निसंग्रहाग्निहो
त्रयोःकृताधानस्याकृताग्निहोत्रस्यापि।विवाहग्रहणंभ्रातृमात्रविषयं।प्रथ
मग्रहणंपुनराधानादौपित्रादेरकृतपुनराधानत्वेपिपुत्रादेरदोषइतिदर्शयि
तुं।अपिशब्देनपितामहःसंगृहीतः।सोदरइत्यसोदराणामदोषइतिदर्शितं।
अतएवतत्रैवोक्तं।क्षेत्रजादावनीजानेविद्यमानेपिसोद रे।नाधिकारविधा
तोस्तिभिन्नोदर्येपिवौ रसइति।पूर्वार्द्धेक्षेत्रजादीनांपितरमभिप्रेत्यासोद
रत्वं।द्वितीयार्द्धेदत्तकादीनांमातृतोपिसोदरत्वं।यागादावप्याज्ञायांनदोष

५ इति। तत्रैव। पितायस्याग्रजोभ्राताननुर्याद्वापितामहः। तपोग्निहोत्रंयज्ञंवाज्ञयाकु
र्यात्कठाश्रुतेरादिति। निमित्तविशेषेत्वाज्ञांविनाप्यदोषःसुमंतुनोक्तः। व्यसनास
क्तचित्तोवानास्तिकोप्यथवाग्रजः। कनीयान्धर्मकामस्तुआधानमपिकारयेदि
ति। अग्रजइतिपित्रादेरुपलक्षणं। आधानमितियागादेः। अथवेतिस्मृत्यंतरोक्त
जात्यंधबधिरपंग्वादिसंग्रहार्थं। आज्ञायामपिक्वचिददोषः क्वचिद्दोषइत्युक्तंत्रि
कांडमंडनेज्येष्ठेश्रद्धाविहीनेसत्याधानंतदनुज्ञया। पितुःसत्यप्यनुज्ञानेनैवा
धीतुकदाचनेति। अत्रचपित्रादावधिकारिण्यपितदाज्ञयापुत्रादिराधानादि ५
न

नकुर्यात्। यद्वाभ्रात्रनुज्ञयैवकुर्यात्। नपित्रनुज्ञयेतितात्पर्यं। इतिकेचित्। अन्येत्वाहुः।
कादाचित्कांधत्वनास्तिकादौतदपगमेपुनःकरणशंकायामप्यनधिकारएव। अल्प
बाधेनाप्युपपत्तौबहुबाधस्यान्यायत्वात्। द्विविधोनाधिकारी। अंधादिर्नास्तिकादि
श्च। तत्रनिषेधस्तावत्सर्वविषयः। तत्राधिकारिणिपित्रादौविशेषतःप्रतिप्रसवाभा
वात्पुत्रादेरनधिकार एव। प्रतिप्रसववाक्यानितु चाद्यैकवाक्यत्वाभ्यांश्रनधिका
रिणंविषयीकुर्वंति। जात्यंधादौपित्रादावनधिकारिण्यपितदाज्ञयाऽधानाद्यधि
कारः। न्यायवचनसिद्धानधिकारोपजीवनेनतन्मनोनुकूलमात्रार्थतयाज्ञावाक्य

६ स्यात्तिलाघवात्। अतिनास्तिकादौतुपित्रादावनधिकारिणिसत्ययंतनास्तिक्ये
नाधानादिकरणसंभावनानिवृत्तावप्ययज्ञानुमत्येवाधिकारः।पितुस्त्वनुमत्या
पिननिषेधबाधकाज्ञावाक्यबाधकतयानिषेधप्रतिप्रसवार्थलाघवात्। अतए
वश्रद्धयाहीनइत्युक्तं।एतद्विषयमेवचदारैस्तूपरिविधंतेनाग्निहोत्रेणनेज्यये
तिहारीतवचनंज्ञेयं। अथवाअनुमत्याकनिष्ठेकृताधानादौपश्चान्नास्तिक्यनि
वृत्तेप्रायश्चित्तादिपूर्वकमाधानादिप्रवृत्तिमत्ययजेविवाहाग्निहोत्रयोर्विशेषा
भिधानार्थत्वेनदृष्टव्यं।पश्चाद्विवाहेदोषएवाआधानादौतुनेति।यदातुकदाचि ६

न्नास्तिक्येनपित्रादावाधानादिकरणसंभावनातदानुज्ञयापिनाधिकारः। अ
धिकारिणिपित्रादौदूरापास्तएवानुज्ञयाधिकारइति।तथाकात्यायनः।सपितुःपि
तृकृत्येषुअधिकारोनविद्यते।नजीवंतमतिक्रम्यकिंचिद्दद्यादितिश्रुतिरिति।निगमे
चसएव।पित्र्यंजीवत्पितर्नोक्तमिति।पितृकृत्यानिश्राद्धतर्पणस्वधाकारपितृत्य
र्थदानादीनि।पितृशब्दश्चेहसपिंडीकरणश्राद्धजन्यपितृभावमापन्नान्मनुष्यान्
पितॄनगृह्णाति।नत्वग्निष्वात्तादीन्देवपितॄन्।तन्मात्रपरत्वेउभयपरत्वेवाप्रमा
णाभावात्।मनुष्यैमात्परत्वेतुनजीवंतमितिवाक्यशेषएवप्रमाणं। अयंचनिषे

पित

७ धो अविशेषेणनित्यनैमित्तिककाम्यानि अहरहरमावास्यादौसूर्यचंद्रग्रह
णादौपुत्रपश्वादिफलार्थतयाविहितानितर्पणश्राद्धादीनिविषयीकरोति।त
त्रपितुःसपितुःकस्मिंश्चित्काले कस्मिंश्चिद्देशेकस्मिंश्चिन्निमित्तेकस्मिंश्चित्कर्म
णितर्पणश्राद्धादीनांप्रतिप्रसवोदृश्यतेतेनतानितस्यानुष्ठेयानिभवंति।एतेषु
तुनकथंचिदपिप्रतिप्रसवस्तानिनिषिद्धत्वादेवाननुष्ठेयानीतिसामान्यनिर्णयः।
तत्रचनिषेधस्यावगतत्वात्।प्रतिप्रसवेनिरूपितेपरिशेषा न्नदविषयाणांनिषे
धविषयत्वेनानुष्ठेयत्वंसुज्ञानमितिप्रतिप्रसवोनिरूप्यते।तत्रमैत्रायणीयपरिशि ७

ष्टेऽद्वाहेपुत्रजननेपित्र्येएयांसोमिकेमखे।तीर्थब्राह्मणश्रायानेषडेतेजीवतः
पितुरिति।उद्वाहइतिस्वस्यद्वितीयादिविवाहे।नप्रथमविवाहे।प्रथमविवाहस्य
पितृकर्तृकत्वात्।नांदीश्राद्धंपिताकुर्यादाद्येपाणिग्रहेबुधः।अतऊर्ध्वंप्रकुर्वीतस्वय
मेवनुनांदिकमितिसंग्रहवचनात्।पुत्रजननइतिपुत्रशब्दोपत्यमात्रपरः।पुमांस
एवमेपुत्राजायेरन्निति।सामानाधिकरण्यदर्शनादिति नारायणीयवृत्तौसाधि
तं।जननशब्दोवापत्यसर्वसंस्कारपरः।पितादक्षिणतइतिचौलेपितैनंवोपनयेत्पु
त्रमितिचोपनयनेनियमदर्शनात्। ततश्चापत्यमात्रस्यगर्भाधानादिविवाहांत

८ सर्वसंस्कारइत्युक्तंभवति।पित्रेष्ट्वामितिचातुर्मास्यांतर्गतमहापित्रयज्ञे।सोमिके
मखइतिसोमयागेतृतीयसवने।तीर्थइतितीर्थप्राप्तिरूपेनिमित्ते।नत्वधिकरण
सप्तम्येषानिप्रसंगपातात्।ब्राह्मणआयातइतिश्रोत्रियोब्रह्म
विद्यावा।वेदार्थविज्ञेयसामात्रिमधुस्त्रिसुपर्णकइतियाज्ञवल्क्योक्तविशिष्टब्रा
ह्मणस्यकदाचित्सोमो।इदंचमुन्यन्नंब्राह्मणस्योक्तंमांसंक्षत्रियवैश्ययोरित्यादि
निगमाद्युक्तविशिष्टइत्यस्याप्युपलक्षणं।इत्यंब्राह्मणसंपत्तिरित्येकयोगनिर्दे
शात्।अतएवरामायणेश्रीरामेणजीवत्पितृकतादृशायांकृष्णमृगमांसेनश्राद्धं ८

कृतमित्युक्तं।हविर्निर्वेद्यदेवेभ्यःपितृभ्यस्तदनंतरं।निर्वापपवित्रेषुनिर्वपत्सलि
लांजलिमिति।जीवतःपितुःपुत्रस्येतिशेषात्।अनादरेषाषष्ठी।जीवत्पित्रनादरेणेति।
एतेश्राद्धादिकालाइत्यर्थः।षडित्यवांतरपरिच्छेदकांतरापेक्षयोक्तं।इदंचस्वकृतग
णनप्राप्तसंख्यानुवादः।नतुपरिसंख्यार्थं।परिशिष्टेएवंजीवत्पितृकस्यश्राद्धांत
रेष्वधिकारदर्शनात्।अन्वष्टक्यांगयाप्राप्तोसत्यांयच्चमृतेहनि।मातुःश्राद्धंसुतः
कुर्यात्पितर्यपिचजीवति।आन्वष्टक्यंअन्वष्टकाश्राद्धं।गयाप्राप्तोसत्यामितिप्रासं
गिकगयाप्राप्त्यभिप्रायं।अतएवस्मर्यते।गयांप्रसंगतोगत्वामातुःश्राद्धंसमाचरे

दिति।एवंचमहानदीषुसर्वासुतीर्थेषुचगयामृते।जीवत्पितापुत्रःकुर्वीतश्राद्धंपार्वणधर्म
वदितिपरिशिष्टएवश्रुतोनिषेधोगयामुद्दिश्यगत्वामातुःश्राद्धंनकुर्यादित्येवंपरोव्या
ख्येयः।महानदीष्वपितीर्थेषुपरिगणितासुसमुद्रगासुनदीषुइति।एतेनदर्शश्राद्धं
गयाश्राद्धंश्राद्धंचापरपक्षिकं।नजीवत्पितृकःकुर्यान्निलेःकृष्णेश्चतर्पणमितिलोगा
क्षिवचनमपिव्याख्यातं।दर्शश्राद्धंपिंडपित्रयज्ञविषयं।कात्यायनेनापिंडपित्रयज्ञे
जीवत्पितृकस्यहोमांतमनारंभोवेतिपक्षद्वयस्योक्तत्वात्।गयाश्राद्धमितिप्रयागव
त्।आपरपक्षिकमितिकृष्णपक्षांतर्गतमन्वष्टकाश्राद्धं।पिंडपित्रयज्ञारंभपक्षेपिंड

पित्रयज्ञकल्पेनेतिव्याख्येयं।अन्यथासामान्यनिषेधेनैवनिषिद्धत्वादेतद्वचनवैय
र्थ्यापातात्।नचानेनतदुपसंहारइतिवाच्यं।तथासतिजीवत्पितृकस्येतच्छ्राद्धव्यतिरि
क्तसर्वश्राद्धप्राप्तेः प्रतिप्रसवांतरवैयर्थ्यापातात्।एतज्जीवत्पितृकोनकुर्यादित्यर्थः।
तर्पणेतुवक्ष्यते।पिंडपित्रयज्ञस्यपाक्षिकारंभोक्त्यापाक्षिकीजीवत्पितृककर्तव्यता
सिध्यति।अतएववक्ष्यमाणस्तंप्रतितद्विशेषविधिरुपपन्नोभवति।मत्स्यपुराणेच।
उत्सवानंदसंतानयज्ञोद्वाहादिमंगले॥मातरःप्रथमंपूज्याःपितरस्तदनंतरं।ततो
मातामहाःपूज्याविश्वेदेवास्तथैवचेति।संतानयज्ञोद्वाहसमभिव्याहारेणउत्सवा

१० नंदश्राद्धोपात्ततुलापुरुषलक्षहोमादिशांतिकपौष्टिकेष्वपितुतदंगभूतनांदी
श्राद्धनिषेधेनांगारोधेनप्रधानानधिकारेप्राप्ततदंगत्वेनमातरःप्रथमंपूज्या
इत्यादिनाप्रधानविधिनाजीवत्पितृकस्याधिकारावगमात्।नांदीश्राद्धेपितस्य
सांगप्रधानाधिकारेणैवाधिकारःसिध्यति।एवंचैषोऽर्थःसिध्यति।जीवत्पितृक
स्तुस्वद्वितीयादिविवाहेगर्भाधानापत्यसंस्कारेषुनांदीश्राद्धंकुर्यात्।पित्रेष्टि
सोमयागयोःपुराशरखंडेउक्तं।पिंडदानंकुर्यात्।पिंडपित्र्ययज्ञकरणपक्षेचश्रोत
स्मार्ताग्निमांश्चपार्श्विकंपिंडदानंकुर्यात्।तीर्थेदत्त्वाब्राह्मणसंपन्नोचश्राद्धंअन्वष्ट १०

काम्यगयाप्राप्तोक्षयाहेचमातश्राद्धंशांतिकपौष्टिकेषुनांदीश्राद्धंचकुर्यादिति।एवं
तावच्छ्राद्धविशेषप्रतिप्रसवउक्तः।अधुनासर्वश्राद्धप्रतिप्रसवउच्यते।तत्रकात्याय
नः।ब्राह्मणादिहतेतातेपतितेसंगवर्जिते।व्युत्क्रमाच्चमृतेदेयंयेभ्यएवददातिसा
विति।ब्राह्मणादीत्यादिपदेनगवांग्रहणं।पतितेब्रह्महत्यादिपतनीयकर्मयुक्तेसं
गवर्जितेसंन्यस्ते।व्युत्क्रमात्पितामहेजीवतिपितरिमृतेयेभ्यएवेत्यस्यायमर्थः।प
तितेसंन्यस्तेतातइतिविद्यमानइतिद्रष्टव्यं।वृद्धौतीर्थेचसंन्यस्तेतातेचपतिते
सतीतिस्मृत्यंतराच्च।अस्मिन्विषयेयेभ्योसोपितादातितेभ्यःस्वयंदेयमिति।ए

११ तच्च प्रागुक्तविषयेषुचनिमित्तप्रवेशादस्मिन्निमित्तेजीवत्पितृकस्यनित्यामावा
स्यादिश्राद्धनैमित्तिकं कथंहणादिश्राद्धकाम्यायुःकामादिश्राद्धप्रतिप्रसवार्थंविशेषा
भावात्। ब्राह्मणादिहतइतिदर्पादिनाब्राह्मणाद्यभिभवार्थंप्रवृत्तोब्राह्मणादिभि
र्हतइति। आत्मघातित्वात्संवत्सरंयावदसंस्कार्यःतावत्पुत्रस्यपुत्रजननतीर्थप्रा
प्त्यादौपितायेभ्योददातितेभ्योदद्यादित्यर्थः। युक्तंचाऽमृतइतियुक्तममृतेसपिं
डीकरणाभावपक्षेतस्यपितृभावापत्यभावात्। संप्रदानायोग्यत्वादेभ्यःपिता
स्वपितृजीवनेनस्वपितामहादिभ्योददौ। तेभ्यःस्वयंपुत्रोदद्यादित्यर्थः। अत्रव्या ११

ख्यानांतरंतत्रचवक्तव्यमप्रस्तुतत्वान्नोच्यते। एवंचयुक्तमाभावेपिसपिंडीक
रणपर्यंतंपुत्रजननतीर्थप्राप्त्यादौपितामहादिभ्यएवददद्यात्। पितुःपितृत्वाभा
वात्निमित्तेचनैमित्तिकावश्यकत्वादितिसिध्यति। पक्षांतरेततदाद्येवक्ष्यते।
जीवत्पितृकस्यदौहित्रप्रतिपच्छ्राद्धेपिप्रतिप्रसवःस्मर्यते। जातमात्रोपिदौहित्रोवि
द्यमानेपिमातुले। कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विनेसितेइति। पित्रादिश्राद्धइव
पुत्रस्यदौहित्रस्यमहालयानंतरप्रतिपदिजातमात्रस्याधिकारइत्यर्थः। एवमेवजी
वत्पितृकस्या न्यत्रापिश्राद्धेप्रतिप्रसवोबोध्यः। यथाभ्रातृपुत्रस्यापुत्रपितृव्यस्य

१२ र्षिके।अपुत्रस्यपित्व्यस्यश्राद्धादिपित्वद्भवेदितिस्मरणात्।भ्रातॄणामेकजाता
नामेकश्चेत्सुत्रवान्भवेत्।सर्वेतेनपुत्रेणपुत्रिणोमनुरब्रवीदितिमनुस्मरणात्।।
तथाकनिष्ठभ्रातुर्ज्येष्ठभ्रात्वार्षिकं।ज्येष्ठोभ्रातापितुःसमइतिस्मरणात्।तथास
पत्नीपुत्रस्यसापत्नमातुःश्राद्धं।सर्वासामेकपत्नीनामेकाचेत्पुत्रिणीभवेत्।सर्वास्ता
सांतेनपुत्रेणपुत्रिण्योमनुरब्रवीदितिमनुस्मरणात्।तथादौहित्रस्यापुत्रवन्माता
महवार्षिकश्राद्धं।यथाव्रतस्थोपिसुतःपितुःकुर्यात्क्रियांनृप।उदकाद्यामहाबाहो
दौहित्रोपियथार्हतीतिमत्स्यपुराणवचनात्।नचैतेषांवाक्यानांसाधारण्यादमा १२

वास्यादावपिप्रसक्तिरितिवाच्यं।देवलेनएवमप्याचरेच्छ्राद्धंषड्वैवत्यंमहामुने।इत्य
मावास्यायांतद्विरुनीषुचषड्वैवत्यनियमेपित्व्यादिप्रापकाभावात्।तेनमातामहेवि
रोधएवनास्ति।पित्व्यादीनांतुवार्षिकंभवत्येवापुलस्त्यनश्याहंप्रक्रम्यपित्व्यभ्रा
तृमातृणामेकोद्दिष्टंचपार्वणमित्युक्तत्वात्।भ्राताज्येष्ठः।मातेतिसापत्नमाता।पित्रो
र्वार्षिकस्यपृथगभिधानात्।एकोद्दिष्टपार्वणयोर्विकल्पः।पित्श्राद्धवत्।इहच
अपुत्रस्यपित्व्यादेःपत्न्यांसत्यांनान्येषामधिकारः।अपुत्रापुत्रवत्नीइत्युशन
स्मरणात्।भार्यापिंडंपतिर्दद्याद्भ्रेर्भार्यातथैवचेतिशंखोक्तेः।साक्षाद्विधायक

१२ त्वाच्चान्येषांदुर्बलत्वात्। अपुत्रपत्न्यास्तत्सपत्नीपुत्रेसतिभर्तुरन्येषांचनाधिकारः।पितृपत्न्यश्चसर्वामातरइतिसुमंतूक्तसापिंड्यविशेषस्यबलवत्त्वात्।भार्यापिंडंपतिर्दद्यादित्यस्येतदभावविषयत्वात्। नचवैपरीत्यंशंक्यंद्वादशापुत्राभावमुक्तानंतरंमनुनैतस्योक्तत्वात्। अन्यापेक्षयातुभर्तुरेतस्मादेवबलवत्त्वं।सपत्नीपुत्रस्यदौहित्रादिभ्यःसापिंड्यविशेषादेवबलवत्त्वं।दौहित्रभ्रातृपुत्रसमवायेतुमृतस्यविभक्तत्वेदौहित्रस्यबलवत्त्वं। अपुत्रायनंभर्तुःपालयंतीव्रतेस्थिता।पत्न्येवदद्यान्नपिंडंकृत्स्नमंशंलभेतचेति।पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरइति १२

वांशहरत्वस्यपिंडत्वप्रयोजकत्वदर्शनात्। अविभक्तत्वेतुभ्रातृपुत्राणामेवबलवत्त्वंअंशहरत्वादेव।एवंभ्रातृतत्पुत्रयोःसमवायेभ्रातुर्बलवत्त्वंअंशहरत्वेप्राथम्यात्।सापिंड्येष्वेवमाद्यन्यतोविस्तरतोज्ञेयं।ऊर्ध्वदेहिकेतुकश्चिद्विशेषोवक्ष्यतेजीवदजीवत्पितृकसाधारणमप्येतज्जीवत्पितृकस्यावश्यकमित्यन्यत्रोक्तं।यत्तुसुमंतुवचनंजीवत्पितृकोनकुर्याच्छ्राद्धमग्निमृतेद्विजइतितन्नासामान्येनाहिताग्नेःश्राद्धनिषेधकंमात्रादिवार्षिकादेरकरणात्प्रसंगत्वात्। किंत्वग्निसाध्येष्वानष्टकादिषुअग्निंविनापिंडपित्र्ययज्ञकल्पंविनासाग्निकोजीवत्पितृकोनाधिकारी

१४ त्येवंविधंज्ञेयं।यथानदर्शेनविनाश्राद्धमाहिताग्नेर्द्विजन्मनइतिमनुवचनंमृतपि
तृकेष्यान्वष्टक्याद्यकरणप्रसंगाद्यथाश्रुतार्थत्यागेनाग्निसाध्येषुदर्शंविनापिंड
पितृयज्ञस्यैवानुष्ठितप्रकृतेरेवविकृतावधिकारात्।तदनारंभेहोमांतत्वेवानाहि
ताग्नित्वेचस्मार्तश्राद्धविधितःप्राप्तंश्राद्धंभवत्येवबाधकत्वाभावात्।वैपरीत्येबा
धकस्योक्तत्वात्।यदात्वाहिताग्निःपिंडपितृयज्ञविधिनाकरोतितदातेनैवसिद्धिः।
शारवांतरादिकरणन्यायेनकर्मणएकत्वात्।नचमानवेनैतत्सिद्धिःसोमंतुवचनं
व्यर्थमितिवाच्यं।कस्यचिद्विशेषमात्रपरत्वेपिकर्तृभेदेनादोषात्।प्रपंचितंचैतद् १४

स्माभिरन्यत्रेषुपरम्यते।एवंजीवत्पितृकस्ययत्रश्राद्धेधिकारस्तत्रकिंचिन्नकार्यं॥
नजीवत्पितृकःकुर्याज्जानुपातंचनीविकामितिस्मरणात्।जानुपातोवामजानुन्याभा
दः।नीविकानीविबंधः।वाजसनेयिनांनिहन्मिसर्वंयदमेध्यवद्भवेद्वाश्वसर्वंसुरक्षो
नवामया॥रक्षांसियक्षाश्चपिशाचगुह्यकाहतामयायातुधानाश्चसर्वेइतिमंत्रेण
पाद्यानंतरंक्रियमाणंप्रसिद्धंनिवीबंधनं।एवंपिंडदानंतत्सहचरितपदार्थांतराणिच
निषिद्धानि।तानिवक्ष्यामः।एवंजीवत्पितृकस्यश्राद्धप्रतिप्रसवोनिरूपितः।इदानीं
प्रतिप्रसवोनिरूप्यते।तत्रसुमंतुवेत्रंपायनाग्निघात्तादिदेवपितृषुनिषेधोनप्रवर्त

तदुक्तं।तेनजीवत्पितृकस्यतर्पणंभवत्येव।तेनस्नानांगपितृतर्पणेधिकारः सिद्धः सांगप्रधानाधिकारात्।यत्तुप्रधानतर्पणं अग्निष्वात्तानां।तत्रकात्यायनः।जीवत्पितृकोयेतानपि।नचेतद्यर्थनिषेधाप्रवृत्तेरितिवाच्यं।अन्याश्चेतरदित्युत्तरत्रमृतपितृकस्यान्येषामपिविहितत्वादस्यजीवत्पितृकएतानेवेत्येतत्परत्वात्।यच्चश्राद्धांगभूतंमनुष्यपितृतर्पणंतदपिजीवत्पितृकस्यभवत्येवप्रागुक्तमार्गेणश्राद्धाधिकारेसिद्धेसांगएवतस्मिन्नधिकारात्।यमभीष्मतर्पणमपितस्यभवति।जीवत्पिता प्रकुर्वन् तर्पणंयमभीष्मयोरितिब्रह्मपुराणवचनात्।यमतर्पणंकार्तिक

शुक्लचतुर्दश्यांविहितं।भीष्मतर्पणंकार्तिकशुक्लैकादशीप्रभृतिविहितंयच्चतीर्थेपितृतर्पणंयदपितीर्थश्राद्धाङ्गंतोपितृतर्पणंतदपितस्यभवत्येवश्राद्धवत्।पिंडदानंभवतीतिवक्ष्यामः।एवंतर्पणाधिकारेसत्यपिकिंचिन्नकर्तव्यं।तत्रतिलैःकृष्णैश्चतर्पणमितिउदाहृतवचनेनतर्पणेतिलानिषिद्धाः।तर्पणग्रहणाच्छ्राद्धेतिलानामनिषेधः।कृष्णग्रहणंशुक्लैस्तुतर्पयेद्देवानितिदेवतर्पणेशुक्लानिवृत्यर्थमितिकेचित्।कृष्णस्योद्देश्यत्वविशेषणस्याविवक्षयातिलमात्रनिषेधइतिसाधुप्रतिभाः।तथानजीवत्पितृकःकुर्याद्वस्त्रनिष्पीडनंबुधइतिपुराणेवस्त्रनिष्पीडनंनिषिद्धं।अनेनजलाईवासाःस्थलस्थःप्रदद्याज्जलांजलिं।वस्त्रनिश्चोतनमितिसुमंतूक्तं।निराशाःपितरो

योनिवस्त्रनिष्पीडनेकृतेतस्मान्नपीडयेद्वस्त्रमकृत्वापितृतर्पणमिति।पराशरोक्तंवस्त्रनिः
पीडनंनिषिद्धं।श्राद्धेतर्पणेचजीवत्पितृकस्यकिंचिन्निषिद्धं।यथाश्राद्धेअर्घ्यपात्रंप्रकल्प्यप्र
जापतिनासोवर्णंराजतंताम्रंवाखड्गंमणिमयंतथेत्युक्तंखड्गं।तथाचसत्यव्रतेन।खड्गमोक्ति
कंहस्तेनकर्तव्यंपितृतर्पणमित्युक्तंखड्गंनिषिद्धं।नजीवत्पितृकःकुर्यात्सिद्धंखड्गंनधारये
दितिपुराणवचनात्।तथाअपसव्यंततःकृत्वाभूत्वाचपितृदिङ्मुखः।पितॄंदिव्यानदिव्यां
श्चपितृतीर्थेनतर्पयेदितिपैठीनसिनोक्तमपसव्यंनिषिद्धं।नकुर्वीतापसव्यंचनकुर्वीतापि
मुंडनं।नजीवत्पितृकःपित्र्यंप्रकुर्वीतकदाचनेतिरुद्रगार्ग्योक्तेः।अयंचापसव्यनिषेधोनस
र्वथाआप्रकोष्ठात्कर्तव्यंमातापित्रोस्तुजीवतोरिति।एवंजीवत्पितृकस्यश्राद्धतर्पणादि १६

कारेसिद्धेयत्रवार्षिकादौमात्रादिश्राद्धंतदंगतर्पणंचतत्रमात्रादीनामेवदेवत्वान्नमात्र
श्राद्धंतन्मात्रतर्पणंचभवत्यसंदिग्धं।यत्रतुतस्यसामान्यतःश्राद्धमात्रमुक्तं।यथातीर्थस
व्यस्नादिपितृकृत्वेचतत्रसकेभ्योदद्यादित्यपेक्षितेमनुनोक्तं।म्रियमाणेतुपितरि पूर्वेषामे
वनिर्वपेदिति।कात्यायनेनाप्युक्तमुदाहृतं।येभ्यएवददात्यसाविति।संग्रहेपिवृद्धौतीर्थेच
संन्यस्तेतानेवपतितेसति।येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतइति।इहचपरिगणन
मन्येषामप्युपलक्षणं।संन्यस्तइत्यादिसंन्यस्तादिजीवत्पितृकस्यामावास्यादिरित्यादि
सर्वश्राद्धप्रतिप्रसवइत्युक्तंप्राक्।संन्यस्तेमृतेतदाद्येवदद्यात्।युक्तंचमृतेतुप्रागुक्तं॥
ततःपितामहेमृतेअनंतरमपिसपिंडीकरणंविनैवपित्रादिभ्योदेयंनैवकार्यासपिंड

१७ तेत्येवकारादिग्रकेचित्। अन्येत्वाहुः। व्युत्क्रमनिमित्तत्वान्निषेधस्यतत्पर्यंतमेवस
पिंडीकरणंकृत्वापित्राद्येवदद्यात्। विवृतंचैतत्। अन्यत्रपतितात्मघातिनोस्तूमृतयोः
प्रायश्चित्तानंतरंतदोर्ध्वदेहिकंकृत्वातदाद्येवदेयं। पतितस्यप्रायश्चित्तानर्हत्वेतुवहि
ष्कारादिकार्यमित्याद्यन्यतोवगंतव्यं। येभ्यइत्यत्रकेचिदाहुः। मृतमातृकोमृतमातामह
कश्चजीवत्पितृकंपितुःपित्रादिभ्योदत्वास्वमातृमातामहादिभ्योदद्यात्। येभ्यइत्यस्य
यद्रूपावच्छिन्नेभ्यइतितेभ्यइत्यस्यतद्रूपावच्छिन्नेभ्यइत्यर्थात्। एवंजीवन्मातृपितृकःपि
तृमात्रादिभ्योदत्वास्वमातामहेभ्योदद्यात्। तथाजीवत्पितृकमातामहकश्चपितुःपितृ
मातामहादिभ्योदत्वास्वमात्रादिभ्योदद्यादिति। अन्येत्वाहुः। यत्तुछंदोव्यक्तिविशेषव १७

चनत्वास्मृतिलक्षणायांप्रमाणाभावात्। पितुःपितृमृतमातृकादिमातामहादि
भ्यएवदद्यादिति। सांप्रदायिकै श्चायमेवपक्षोनुस्मृतः। तीर्थमहालयादौत्वनेकदेव
तेपिवक्ष्यमाणप्रकारेणस्वमातृमातामहेभ्यःपितृपत्नीत्वपितृश्वश्रूत्वेनैवदद्यात्।
ददात्यविशेषोक्तेः। श्राद्धान्नदानतर्पणोदकदानमपिपितुःपित्रादिभ्यस्तीर्थादौप्रसा
हिकंचसंन्यस्तादिपितृकस्यसिध्यति। स्वयंसुतइतिस्वाधिकारउक्तः। तेनजीवत्पितृ
कःयदास्वाधिकारकंवृद्धितीर्थमावास्यादिश्राद्धंकरोतितदापितृसंप्रदानेभ्योद
द्यादित्यर्थःसिध्यति। तत्रचनपितामहनप्रपितामहवृद्धप्रपितामहत्वेनतेषांदेव

१८ तातं। किंतुपितुःपितृपितामहप्रपितामहत्वेनध्रियमाणेतुपितरिपूर्वेषामेवनि
र्वपेदित्युक्तापितुःसनामसंकीर्त्यकीर्तयेत्प्रपितामहानितिमन्त्रोक्तेःइहत्वाद्यंतय
हणेनपितृपितामहप्रपितामहत्वेनपितामहादीनांजीवत्पितृकंप्रतिदेवतात्वमुक्तं।
तेषुचपितृत्वादेःपितृप्रतियोगित्वेनस्वप्रतियोगिकत्वाभावात्।संबंधघटकत्वेनपि
तानिर्देष्टव्यः।ततश्चजीवत्पितृकैःसर्वत्रश्राद्धतर्पणादौपितुःपितृपितामहप्रपिता
महानामितिप्रयोगःकार्यइतिसिद्धं।इहचपितृपितामहग्रहणमुपलक्षणंसर्वेषामि
तिसामान्योपक्रमात्।तेनसर्वत्रपितुर्मातृपितामहिप्रपितामहीनांपितुर्मातामहमा १८

तुःपितामहमातुःप्रपितामहानामितिपितुःपत्न्याःपितृभ्रातरित्यादिप्रयोगःसिध्य
ति।एवमेवहिदेवतात्वंयेषांनपितामहपितामहित्वमापितृव्यादिनाश्राद्धविशेषानुवि
धानाद्धैधस्यदेवतात्वस्याविधेश्चपितृसंबंधिरूपपितृत्वान्नैवदेवतात्वावगमात्।य
त्तुस्वाधिकारिकमपिमातृमातामहपितृव्यादिवार्षिकादिश्राद्धंतत्रमातृत्वादिनैव
देवतात्वं।मातुःश्राद्धंसुतःकुर्यात्कुर्यान्मातामहश्राद्धंअपुत्रस्यपितृव्यस्येत्यादिभिस्त
थैवावगमात्।एवंस्वाधिकारः।यदातुपित्रायधिकारिकंश्राद्धंपितृगुर्वादिप्रेरितःक
रोतितदाअमुकयजमानस्यपितुर्मातुरित्यादिप्रयोगोद्रष्टव्यः।सर्वत्रपरप्रेरितेःनुगम
संभावात्।पित्रादिघटितमंत्रलोपादिविध्यननुमतबहुविप्लवप्रसंगाच्चेति।एवंजीव

१ पित्रादिसंबंधविशेषोल्लेखप्रमाणाभावात्।संबंधानुल्लेखेचश्राद्धदेवतात्वाभावात्।१

त्पितृकस्यमात्रादिश्राद्धाधिकारेसिद्धेयद्यविभक्ताद्भ्रात्रभ्रातरःतदाएकएवकुर्यात्।
यदिविभक्तास्तदापृथक्कुर्युःयथाहमनुः।भ्रातॄणामविभक्तानामेकोधर्मःप्रवर्तते॥
विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथगिति।धर्मप्रदीपेपि।विभक्तास्तुपृथक्कुर्युः
प्रतिसंवत्सरादिकं।एकेनैवाविभक्तेषुकृतेसर्वैस्तत्कृतमिति।भ्रातॄणामविभक्तानां
पितृदेवद्विजार्चनं।एकमेवविभक्तानांतदेवस्याद्गृहेगृहेइति।तत्रापिज्येष्ठएवकुर्यात्॥
ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवइति।मनुनाज्येष्ठस्यैवपुत्रकार्यकारकत्वोक्तेः।ज्ये
ष्ठाज्ञात्यादौ तदनुज्ञयाकनिष्ठोपिकुर्यात्।यदातुसापत्नभ्रातरःतदावेमातृकेज्येष्ठपि
तृकनिष्ठएवस्वमातृवार्षिकान्चष्टक्यादिमातामहवार्षिकंचकुर्यात्।मुख्यपुत्रत्वात्॥

दौहित्रत्वाच्च।मुख्याभावेतुसपत्नीपुत्रेषुज्येष्ठएवायदाभ्रविभक्तेष्वपिभ्रातृपुत्र
स्यचिदेवस्वदत्तीयायुद्वाहोयज्ञादिवाकस्यचिद्देवकार्यत्वेनउपनिष्ठते।तदासए
वतदंगत्वद्विश्राद्धंकुर्यात्।तन्मात्रकर्तव्यत्वेनेतरेषांप्राप्यभावात्।तीर्थेत्वविभक्ते
ष्वपियदैकैकोगच्छतितदातीर्थश्राद्धंकुर्यात्।सहगमनेज्येष्ठएवएकेनैवेत्यस्येहापि
भ्रविरोधात्।यदातुपित्रासहपुत्रास्तीर्थंगतास्तदापुत्राणांनपृथक्तीर्थश्राद्धंपितु
रुपजीव्यत्वेनास्वातंत्र्यात्।यथावैश्वदेवेपितुरुपजीवित्वादेवनाधिकारइतिवक्ष्य
ते।तत्रापिपितुरशक्तौतत्प्रतिनिधित्वेनभवत्येव।यदातुतीर्थेपितास्तेपुत्रश्चतत्रग
तस्तदास्वातंत्र्येणनिमित्तस्यज्ञानत्वात्कालभेदेन तदुपजीवनासंभवात्तीर्थश्रा

२० ङंपुत्रःकुर्यादेवायथादेशांतरगतोवैश्वदेवंकुर्यादितिवक्ष्यते।एवमेवज्येष्ठभ्रातर्य
पितीर्थगतेकनिष्ठभ्रातुरपिश्राद्धप्रतिईष्ट्या।विभक्तानांपित्राभ्रात्रासहपृथग्वाग
मनेपृथगेवश्राद्धंप्रागुक्तवचनात्।सन्यस्तादिपितृकाणाममावास्यादिश्राद्धान्यविभा
गेज्येष्ठेनैवविभागेतुसर्वैःकार्याणीति।अयंचविभागाविभागयोरुक्तोनिर्णयस्तर्पणे
पिसमानः।मात्राद्योर्ध्वदेहिकेतुविभागेपिविशेषोवक्ष्यते।एवंजीवत्पितृपितामहकस्य
प्रपितामहेश्राद्धाधिकारः।त्रितयजीवनेतुनाधिकारः।तथाचविष्णुः।जीवतिपितरियः
श्राद्धंकुर्यात्येषांपिताकुर्यात्तेषांकुर्यात्।पितरिपितामहेचजीवतियेषांपितामहःपित
रिपितामहेप्रपितामहेचजीवतिनैवकुर्यादिति।अनेनद्वितीर्थसन्यस्तपितृकत्वादौ २०

जीवत्पितृकस्यैवद्वितीर्थसंन्यस्तपितृपितामहत्वादौजीवत्पितामहकस्यपितामहे
ज्यश्राद्धंभवतीत्युक्तं।इहापिपितामहस्यपितृपितामहप्रपितामहेभ्यइत्येवंशब्दप्रयो
गनियमः।प्राग्वत्।प्रपितामहेजीवतिततःपरेभ्योनदेयमितिविष्णुमतं।तेभ्योपिदे
यमित्युक्तंयुगमेत।येभ्योवापिपितातेभ्योदद्याद्वैतानकर्मणि।दद्यात्त्रिभ्यःपरेभ्य
स्तुजीवेच्चेत्त्रितयंयदीति।वैतानकर्मण्युपलक्षणं।एवंचविकल्पःसिद्धः।इहचमा
तामहानामप्येवंश्राद्धंकुर्याद्विचक्षणइति।विष्णुर्मातामहेचापिशब्दान्मातरिचवि
द्यमानयोर्मातृपितामहीप्रपितामह्यादिभ्योदेयमितिप्रतीयते।तन्नजीवत्पितृक
विषयं।एवंशब्दयुक्तस्यातिदेशवाक्यस्ययेभ्यःपितादद्यात्तेभ्योदद्यादित्यादिसा

२१ क्षाद्विधायकवाक्येबाधात्।तन्नुमृतपितृकविषयं।इहचयेषांमतेव्युत्क्रममृतसपिंडी
करणंनास्तितेषांमतेयथापितरिमृतेपितामहेजीवतिपितुर्वार्षिकमेकोद्दिष्टमेवाश्र
मावास्यादौतुपितामहस्यपित्रादीनांपार्वणं।यस्यपिताप्रेतःस्यात्सपित्रेपिंडंनिधाय
पितामहात्पराभ्यांद्वाभ्यांदद्यादितिविष्णुवचनस्यपितुःपितामहादिविरव्यानांगीका
रात्।तथातुल्यन्यायतयाजीवत्पितृकस्यमातरिमृतायांपितामह्यांजीवत्सांमातु
र्वार्षिकेएकोद्दिष्टमेवकार्यं।तीर्थश्राद्धादौतुपितुरिज्येभ्योदीयमानेपितामह्यादिभ्य
एवदद्यादितिसिध्यति।अन्येत्वाहुः।एवंसतितस्यगयायामन्वष्टक्येचमातुरेकोद्दि
ष्टंप्राप्नुयात्।आन्वष्टक्यंगयाप्राप्तोसत्यांयच्चमृतेहनि।मातुःश्राद्धंसुतःकुर्यात्सि २१

तंर्यपिचजीवतीति।मातुरेवश्राद्धविधानेनपितुःपितामहादीनामप्राप्तेः।नचवाच्यं।
आस्तामेकमितिप्राकृपकाभावात्।अमावास्याविकृतित्वेनहिसर्वश्राद्धेषुपार्वणता
प्राप्नोति।साचएकोद्दिष्टंप्रकुर्वतमातापित्रोःक्षयेहनि।इत्यादिविशेषविहितेको द्दि
ष्टेनोपपद्यते।नचेहनादृक्प्रापकमस्त्येकोद्दिष्टस्य।अतएवव्युत्क्रममृतेमात्रादिसपिं
डीकरणंवक्ष्यमाणमावश्यकंमेनिरेसांप्रदायिकाः।तस्मात्सितरिमृतेपितामहेजीवति
पितृपिंडंदत्वास्वपितामहात्पराभ्यांद्वौपिंडौदद्यादित्येवंपार्वणेविशेषविधिरिति
व्याख्यांगीकृत्यसामानन्यायतमामात्रादिश्राद्धेपिमात्रेपितृपितामहिप्रपिता
महीभ्योदद्यादितिप्रएवंपितामहप्रपितामहयोर्जीवतोःपितरिमृतइवपितामह

२२ हि प्रपितामह्योर्जीवत्योर्मातृमरणेपीत्याद्यन्यतोवगंतव्यं। इदानीमान्वष्टक्येविशेषो
भिधीयते। तत्रान्वष्टकाचतुष्टयमुक्तमाश्वलायनेन। हेमंतशिशिरयो श्चतुर्णामपरप
क्षाणामष्टमीघष्टकाइत्युक्ताअपरेद्युरन्वष्टक्यमितिपंचम्यपितेनैवोक्ता। एतेनमाघ्या
वर्षंप्रोष्ठपद्याअपरपक्षइति। मध्यवर्षास्वष्टम्यादिषुभवतीत्यर्थः। माघावर्षमितिपाठे
तुसंज्ञेयं। इयंचपद्मपुराणेप्युक्ता। प्रोष्ठपद्यष्टकाश्रूयःपितृलोकेभविष्यतीतिपितॄणांव
चनात्। एवंजीवत्पितृकस्यपंचान्वष्टकाअवश्यानुष्ठेयामृतपितृकस्येवा। यदातुसर्वत्राश
क्तिः। तदापंचम्यावश्यकी। सर्वासामेवमातॄणांश्राद्धंकन्यागतेरवौ। नवम्यांहिप्रदातव्यं
ब्रह्मलब्धावरायतइतिस्मृतेनावश्यकत्वस्मरणात्। सर्वासामित्युक्तेरेवंसिध्यति। यद्य २२

पिमातृश्राद्धस्यजनन्यामेवमुख्यत्वादान्वष्टक्यविधितःसपत्नीनांनप्राप्तिः। तथापि
ताभ्योप्यवश्यंदेयमितितेनस्वमातरिसत्यामपिताभ्योदद्यात्। तस्यांमृतायांचताभ्य
स्तस्येचदद्यात्। तत्रचअसावितिमंत्रेणसर्वासांनामनिर्देशेनएकस्मिन्ब्राह्मणेऽर्घ्यपिं
डावाहनादिषुयोजना। एकनामत्वेचतत्रैवहिवचनबहुवचनयोजनेत्यादिविशेषोनारा
यणवृत्त्यादिभ्योवगंतव्यः। यदाजीवन्मातृपितृकआरब्धपिंडपितृयज्ञान्वष्टक्यःपि
तुरित्येभ्योददादसौदनंतरंचमातामृतातदापितुःपित्रादित्रिकायदत्तास्वमातृत्रिका
यदद्यात्। अन्वष्टकासुवृद्धौचगंगायांचक्षयेहनि। अत्रमातुःपृथक्श्राद्धंअन्यत्रपति
नासहेतिविष्णुधर्मोत्तरे। मातॄणांपृथक्केभिहितेपिपुनःमात्रेराजन्यितामह्येश्राद्धंका

ROYAL ASIATIC SOCIETY BOMBAY BRANCH LIBRARY

र्येयथाविधि।तथैवप्रपितामह्येवैश्वदेवपुरःसरमितिपुनर्मात्रादिकीर्तनस्यएवमेवा
र्थत्वंव्यतिरिक्तप्रयोजनाभावात्।पिंडपितृयज्ञेविशेषोभिधीयते।तत्रजीवत्पितृकस्य
होमांतमनारंभोवेतिकात्यायनेनपक्षद्वयमुक्तं।परिशिष्टेत्वपरंपक्षद्वयमुक्तं।होमां
तःपितृयज्ञःस्याज्जीवेत्पितरिजानतः।पितरंभोजयित्वावापिंडौनिर्वपणात्परौयेभ्यः
पिंडान्पितादद्यात्तेभ्यःपुत्रोपिवादद्यादित्येषांनेगमश्रुतिरिति।
एवंजीवत्पितृपितामहादेरपिद्रष्टव्यं।यानिचपिंडपितृयज्ञविधानेनैककर्तृत्वेनोक्ता
निहितेषुपिंडपितृयज्ञविकृतित्वात्तद्देवचत्वारोपिपक्षाः।यदाचपिंडपितृयज्ञाक
रणंतदापिसंन्यस्तादिश्राद्धंभवत्येव।स्मृतीनांसाधारण्येनप्रापकत्वात्।यत्तुदर्शश्रा २३

द्धंगयाश्राद्धंश्राद्धंचापरपक्षिकंनजीवत्पितृकःकुर्यात्तिलैस्तर्पणमेवचेतिकौंडिन्यक्च
स्तदितरस्यनुज्ञाप्रसंगादेवंप्राग्वद्व्याख्येयं।दर्शोपरपक्षिकेपिंडपितृयज्ञविधिनान
कुर्याद्गयाश्राद्धंतुदद्यान्नगत्वानकुर्यादिति॥ ॥अथजीवत्पितृकस्यवैश्वदेवविचारः॥
तत्रयद्यविभक्ताःपित्रासहपुत्रास्तदावैश्वदेवस्यपुरुषार्थत्वेपितेषांपित्रुपजीव्यत्वेन
स्वातंत्र्याभावादन्नसंस्काराच्चपृथङ्नभवति।अविभक्तानामपिदेशांतरगमनासौक
र्यादिनापृथक्पाकेत्वंनस्यासंस्कारत्वेनतद्भोजनेऽन्यथाकिल्बिषीभवेदितिकात्या
यनेनदोषकीर्तनादंनसंस्कारार्थंवैश्वदेवंकर्तव्यमितिकेचित्।अन्येतुवैश्वदेवा
संभवेतुकुक्कुटांडप्रमाणकं।अन्नमग्नौसंप्रहृत्यकिल्बिषात्तुविमुच्यतेस्मरणात्॥

इति

२४ एतद्धिमृतपितृकस्यवैश्वदेवकरणानंतरपाकांतरपक्षइवजीवत्पितृकस्यसदाभव
ति।वैश्वदेवप्रापकाभावस्यतुल्यत्वात्।पित्रासहविभागपक्षेवैश्वदेवोभवत्येवविभ
क्तानांग्निंनधर्मत्वस्योक्तत्वात्।वैश्वदेवंचयदालौकिकाग्नौपाकस्तदातत्रैव।यदितु
स्मार्ताग्नौतदातदपितत्रैवभवति।यदिस्यात्लौकिकेपाकस्तेनान्नंतत्रहूयते।श्रौता
ग्नौतत्रचेदन्नंविधिरेषसनातनइतिकूर्मपुराणवचनात्।एवंजीवत्पितृकस्यवैश्वदे
वेसिद्धेपितृयज्ञस्यनित्यश्राद्धत्वपक्षेतस्यपित्र्यनिषेधादेवभूतयज्ञावेवभवतः।य
दातुपितृयज्ञस्यस्वतंत्रतानित्यश्राद्धत्वं।निषेधस्यमनुष्यपितृयज्ञसंबंधिककर्मवि
षयत्वादेवपितृसंबंधिककर्मविषयत्वात्। पितृयज्ञस्यस्नानब्रह्मयज्ञांतरभावितर्प २४

णादावेवास्तिअधिकारः।संन्यस्तादिपितृकस्यनित्यश्राद्धत्वपक्षेप्यदोषः।क्वचित्तुपित्र्य
त्वाभावेपिजीवत्पितृकस्यविशेषविधानादेवाधिकारः।नाभिमात्रेजलेगत्वाऽऽचम्यान्हि
कंधाद्विजइतिसामान्येनस्नानेकेशादिधारणंविधायजीवत्पितातुकुर्वन्नदक्षि
णेकेशसंचयानितिजीवत्पितृकस्यवामनपुराणेविधानात्।तथेदमपिदर्शस्ना
नंनकुर्वन्नमातापित्रोस्तज्जीवतोः।पुत्रः कुर्वन्निराचष्टेपित्रोरूनतिजीवितेतियोग
याज्ञवल्क्यवचनात्।इदंचशीतोदकस्नानविषयमितिशिष्टोष्णोदकस्नानवि
धेः।मातापित्रोरित्युद्देश्यगतमपिसाहित्यंविवक्षितंमृतपितृकस्यसर्वत्राधिका
रात्।यदाचदर्शएवतीर्थप्राप्त्यादिनिदाननिषेधः।तीर्थाभावेतुकर्तव्यमुष्णोदक

२५ परोदकेरितियमवचनस्यनैमित्तिकविषयत्वेनबलवत्त्वात्।एवंचग्रहणादिस्ना
नस्यापिनैमित्तिकत्वेनबलवत्त्वमूह्यंविस्तरभयान्नेहप्रतन्यतेनैमित्तिकवदेवका
म्यमितिपंथाः॥तथादक्षः॥मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः।नजीवत्पितृकःकु
र्याद्गर्भिणीपतिरेवचेति।मुंडनंशिरोमुंडनं।सर्वशःसर्वंप्रेतकर्म।तेनवहनदहन
ओर्ध्वदेहिकानिनसंभवंति।मुंडनंचप्राग्प्राप्तंसामान्यविधिप्राप्तंचनिषिद्धं॥
यथाश्रुतविनाचपरिवापनमित्यापस्तंबोक्तंमृताल्पवयसांमुंडनंमृतपितृक
विषयत्वेनोपपत्तेःसामान्यविधेः।यत्रनित्यनैमित्तिककाम्येषुवपनंविहितंतत्रभ
वत्येव।तत्रनित्यंचौलोपनयनव्रतविसर्गेषुमुंडनं।आधानदर्शपौर्णमासज्योति २५

ष्टोमादिषुचनैमित्तिकं।तथातीर्थेप्रायश्चित्तेपित्रोर्मरणादौच।काम्यंकाम्यज्यो।ति
ष्टोमतीर्थयात्रादौ।नचनैषांजीवत्पितृकविषयत्वं।चौलादीनामप्यन्यविषयत्वेने
वसंस्कारासंभवप्रसंगात्।वपनमात्रस्यत्वन्यविषयत्वेनित्यानित्यसंयोगविरोधात्।
नैमित्तिककाम्ययोस्तदंगमुंडनयोश्चनित्यनिषेधाद्बलीयस्त्वात्।श्रुतिविहितेमुं
डनेश्रोतत्वेनस्मार्तनिषेधाद्बलीयस्त्वात्।गंगायांभास्करक्षेत्रेमातापित्रोर्गुरोर्मृतौ।
आधानेसोमपानेचवपनंसप्तसुस्मृतं।इतिनिगमवचनाच्च।इदंहितीर्थादौवपनंसा
मान्यविधिनैववपनेप्राप्तेवैयर्थ्यापत्तेर्येनकेनचिज्जीवत्पितृकगुर्विणीपतित्वादिनि
मित्तेनवपननिषेधस्तत्रप्रागुक्तन्यायप्रसिद्धप्रतिप्रसवानुवादार्थंनहिधानार्थंवा।

२६ अतएवस्मर्यते।क्षौरंनैमित्तिकं कार्यंनिषेधेसत्यपिध्रुवं।पित्रादिमृतिदीक्षासुप्राय
श्चित्तेचतीर्थकेइतिनिषेधेसत्यपीत्युक्तेप्रतिप्रसवःसिध्यति।गंगायांभास्करक्षेत्रइ
तितीर्थमात्रोपलक्षणंउभयोपादानंमुख्यत्वात्।विनातीर्थंविनायज्ञंमातापित्रो
र्मृतिंविना।योवापयतिलोमानिसपुत्रःपितृघातकइति।स्नानादिकंविधायादौतीर्थे
मुंडनमाचरेत्।इतिसंग्रहवचनात्।नचैतस्यसामान्यस्यगंगायामितिविशेषणोपसं
हारइतिवाच्यं।सामान्यप्रतिप्रसवार्थत्वेनगंगायामितिविशेषणस्यसामान्यपरत्वो चि
त्येनोपसंहाराविषयत्वात्।प्रतिप्रसवार्थत्वेनैवचसप्तस्विप्युपलक्षणं।नतुनियमार्थं।
मातापित्रोरितिमात्यग्रहणंजीवत्पितृकमात्मरणेमुंडनप्राप्त्यर्थं।गुरोर्मृतइतिक्षेत्रज २६

दत्तकादिविषयं।संग्रहवाक्येलोमग्रहणेपिशिरोविवक्षितं।जीवत्पितृकशिरोवपनए
वशिष्टविगानाच्छिष्टाचारेणतत्रैवोपसंहारात्।एवंक्षौरंक्षुरकर्मवपनमितिचशिरोव
पनमेवद्रष्टव्यं।पिंडदानंचेतिजीवत्पितृकस्यपिंडपितृय ज्ञेहोमांतपक्षेपिंडदानाभा
वान्नद्विषयं।यद्वायत्रश्राद्धसंभवेपिंडदानमात्रमुक्तं।यथादेवलेनपिंडमात्रंप्रदात
व्यमभावेद्रव्यविप्रयोः।श्राद्धाहनितुसंप्राप्तेस्थित्वानिरशनोपिवेति।यथाचदेवीपु
राणे।तीर्थश्राद्धविधिनैवपिंडदानप्राप्तेःपुनः।पिंडदानंतुनछस्तंपितॄणांचैववल्लभ
मिति।तत्रजीवत्पितृकस्यपिंडदानपक्षोनभवति।तर्पणपक्षस्तु।तिलैःसप्ताष्टभि
र्वापिसमवेतंजलांजलिं।भक्तिनम्रःसमुद्दिश्यभुव्यस्माकंप्रदास्यतीतिपितृकल्पे

२७ श्राद्धाशक्तं प्रतिउक्तोभवत्येव। अथवाजीवत्पितृकस्ययानिश्राद्धानिविहितानितेषुतेन
पिंडदानंनकार्यमित्येवमर्थमेतत्। यथाहिव्यतीपातसंक्रांत्यादिश्राद्धानिपिंडरहिता
नितथेहापिपिंडदानराहित्येचतत्सहचरितानामन्येषामपिराहित्यंसिध्यति। पिंडयत्र
निवर्तेतमघादिषुकथंचन। सांकल्पंतुनदाकार्यंनियमाद्ब्रह्मवादिभिरितिछागलेय
वचनात्। सांकल्पस्वरूपंतुवसिष्ठेनोक्तं। आवाहनंस्वधाशब्दःपिंडोग्नौकरणंतथा॥
विकिरंपिंडदानंचसांकल्येषड्विवर्जयेत्। इति। पिंडःउच्छिष्टपिंडः। पिंडदानस्यपृथग
भिधानात्। यत्तुमहापितृयज्ञेसोमयागेचपिंडदानंतन्नेतन्निषेधविषयः। प्रतिप्रसूत
त्वात्। श्रौतत्वेनस्मार्तनिषेधाद्बलीयस्त्वात्। प्रेतकर्मेतितत्संघातगतैश्चैवेत्यादिषुसगो २७

त्रादिसलेसगो त्राद्यभावेचजीवत्पितृकःसगोत्रासगोत्रप्रेतदहनालंकरणादिस
पिंडीकरणांतोर्ध्वदेहिकंचनकुर्यात्। नचप्रेतकृत्यस्यपितृकृत्यत्वादेवनिषेधसिद्धेःप्रे
तकर्मेत्यवाच्यमितिवाच्यं। सपिंडीकरणात्प्राक्पितृत्वाभावात्। अतएवमार्कंडेयेनस
पिंडीकरणमुक्तोक्तं। अतःप्रभृतिवै प्रेतःपितृसामान्यमश्नुते। अयंचपिंडदानप्रेतक
र्मनिषेधोमातुरन्यत्र। यत्रतुमृतश्राद्धमाम्नातं। यथामैत्रायणीयपरिशिष्टे। अन्वष्टक्ये
गयाप्राप्तोसत्यांयच्चमृतेहनि। मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति। तत्रपिंडदानं
भवत्येव। विष्णुधर्मोत्तरे। अन्वष्टकासुचस्त्रीणांश्राद्धंकुर्यात्तथैवचेत्युपक्रम्यपिंडनिर्व
पणंकार्यमस्यामपिनप्तृसत्तमेतिश्राद्धविधिनैवपिंडदानेप्राप्तेपुनस्तत्कीर्तनंनयदाय

२८

स्यपिंडदानंनिषिद्धंतदातस्यतत्राप्यर्थे॥तथाग्निपुराणे।नकालादिगयातीर्थेद
स्यात्पिंडांश्चनित्यशः इतिपिंडदाननित्यत्वकीर्तनस्यकालकर्तृदिघटितपिंडदान
निषेधप्रतिप्रसवार्थत्वात्।यन्नाम्नापात्तयेत्पिंडं तंनयेद्ब्रह्मणाश्वतं।इतिवायवीया
दिवाक्येगयायांपिंडदानप्राधान्यागमात्।तथाचबृहद्विष्णुना।पिंडदानंप्रकुर्वीत
मातापित्रोःक्षयेहनिइतिवार्षिकश्राद्धविधिनैवसिद्धेपिंडदानेनिषिद्धकालकर्त्रा
दिप्रतिप्रसवार्थत्वात्।अन्नाद्यादिनात्वपिंडकश्राद्धकरणंचसर्वसाधारणपिंडदा
नमात्रमनुकल्पंकरोति तदाकेचिन्मतेयत्रनिषेधोनप्रवर्तेतेपिंडदानस्यावश्यक
त्वात्।इदंचजीवत्पितृकस्यपिंडदानंसंग्रहे।विवाहव्रतचूडासुवर्षमर्धंतदर्धकंपिं २८

डदानंमृदास्नानंनकुर्यात्तिलतर्पणमितिनिषेधेपिविवाहाद्यनंतरंभवत्येवातत्रै
वचमहालयेगयाश्राद्धेमातापित्रोःक्षयेहनिहृतोह्याहोपिकुर्वीतपिंडनिर्वपणं
सदेतिसाधारण्येनैवप्रतिप्रसूतत्वात्।अपित्रब्देनोपनयनादेरपिग्रहणं।मृता
हश्राद्धवदेवसपिंडीकरणोत्तरभाविमात्मासिकेष्वपिजीवत्पितृकस्यपिंडदा
नंद्रष्टव्यं।सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः।प्रत्यब्दयोर्यथाकुर्यात्तथाकु
र्यात्सतान्यपि।इतिपैठीनसिस्मरणात्।जीवतिपितरिमातुर्दाहादिप्रेतकर्मपुत्र
एवकुर्यात्।पित्रोःपुत्रेणकर्तव्यापिंडदानोदकक्रियेतिशंखोक्तेः।पुत्राभावेस

२९ पिंडामातृसपिंडाश्चिष्याश्चेदधुरितिगोतमवचनात्।पुत्रेषुविद्यमानेषुनान्येवैवा
चयेत्स्वधांइतिऋष्यशृंगस्मरणाच्च।अन्वयव्यतिरेकाभ्यांपुत्रस्यैवाधिकारः।
यद्यपिविधिर्जीवन्मृतपितृकविषयोनिषेधश्चमातृतदतिरिक्तविषयइति
सामान्यविशेषभावस्तुल्यएवतथापिविधिरेवबलीयान्पुत्रस्यमुख्याधि
कारित्वोक्तेर्बोधकत्वनियामकत्वात्॥जीवत्पितामह्यामातुःकुर्यात्सपिंडतां
॥प्रमीतपितृकःपित्रामातामह्यापितासुतः॥इत्यादिवचनानुरोधात्॥अवि
भक्तेषुज्येष्ठःविभक्तेषुधनमेकीकृत्यज्येष्ठएवकुर्यादितिविशेषः॥नवश्रा २९

द्धंसपिंडत्वंश्राद्धान्यपिचषोडश॥एकेनैवतुकार्याणिसंविभक्तधनेष्वपीति
शातातपस्मरणात्।सर्वैरनुमतिंकृत्वाज्येष्ठेनैवतुयत्कृतं।द्रव्येणाविभक्तेन च
सर्वैरेवकृतंभवेदितिमरीचिस्मरणाच्च।सापत्नभ्रात्रादिष्वपिविभक्तेष्वपिस्वस्वमा
तुस्तत्सुतःकनिष्ठोपिकुर्यात्।विभक्तेषुस्वधनेनपुत्रस्यैवमुख्यत्वेनेतरेषांप्राप्त्य
भावात्॥ ॥एवंस्वस्वमातामहपत्न्यादिष्वपिद्रष्टव्यं।यदातुज्येष्ठमुख्यासांनिधिः
तदाकनिष्ठगोत्रैरस्मदाद्यंतमेवकर्तव्यं।एकादशाहादिसपिंडीकरणांतं
मुख्यज्येष्ठाभ्यामेवकार्यं। असगोत्रःसगोत्रोवायदिस्त्रीयदिवापुमान्।प्र

थमेहनियोदद्यात्सदशाहंसमापयेदितिगृह्यपरिशिष्टात्।एकादशाद्याः
क्रमशोज्येष्ठस्यविधिवत्क्रियाइतिप्रचेतसःस्मरणात्।सपिंडीकरणप्रकर
णेप्रोषितावसितःपुत्रःकालादपिचिरादपिइतिवायुपुराणेपुत्रग्राब्दस्यमु
ख्यपरत्वादिति।एवंतावज्जीवत्पितृकस्यमात्रायुदकपिंडदानादावधिका
रःसिद्धः।क्वचिदन्यत्रापि।यथासपिंडमात्रमरणेउदकदाने।एवंचजीवत्पि
तृकस्यप्रेतोदकदानंसतिलंभवति।जलांजलिंसकृद्दद्यात्सतिलंदक्षिणामु
खइतिस्मरणात्॥नचात्रतिलतर्पणनिषेधावकाशः॥तर्पयेदिति ३०

विध्यभावेनास्यतर्पणत्वाभावादित्याद्यलमतिविस्तरेण॥ ॥छ॥श्रीभ
ट्टरामेश्वरसूरिसूनुःश्रीभट्टनारायणसूनुरग्र्यः॥श्रीरामकृष्णःस्वधिया
व्यधत्तजीवत्पितर्यात्मजकार्यसिद्धिं॥ ॥इतिश्रीभट्टरामकृष्णकृतोजी
वत्पितृककार्याकार्यनिर्णयःसमाप्तः॥ ॥श्रीः॥ ॥संवत१८४१राक्षस
संवत्सरे॥शके१७०६क्रोधीनामसंवत्सरेमार्गशुद्ध४भोमवासरेमहाका
लसंनिधौश्रीअवंत्यांगोदावरीतीरेविलसत्पुण्यस्तंभक्षेत्रस्थाल्युप
नामकनागेशभट्टात्मजशेषभट्टेनलिखितंस्वपरोपकारार्थं॥ ॥श्रीः॥ ३१

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिजीवसिद्धकनिर्णयःस०॥
॥पत्र ३१॥

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY